# श्रीमद् भागवत रसिक कुटुंब

## ॥ श्रीजगन्नाथाष्टकम् स्तोत्र ॥

कदाचित्कालिन्दीतटविपिनसङ्गीतकरवो

मुदा गोपीनारीवदनकमलास्वादमधुपः।

रमाशम्भुब्रह्मामरपतिगणेशार्चितपदो

जगन्नाथः(स्) स्वामी नयनपथगामी भवतु मे ॥ 1 ॥

भुजे सव्ये वेणुं(म्) शिरसि शिखिपिं(ञ्)छं(ङ्) कटितटे

दुकूलं(न्),नेत्रान्ते सहचरकटाक्षं(वँ) विदधते ।

सदा श्रीमद्वृन्दावनवसतिलीलापरिचयो

जगन्नाथः(स्)स्वामी नयनपथगामी भवतु मे ॥ 2 ॥

महाम्भोधेस्तीरे कनकरुचिरे नीलशिखरे

वसन् प्रासादान्तस्सहजबलभद्रेण बलिना ।

सुभद्रामध्यस्थस्सकलसुरसेवावसरदो

जगन्नाथः(स्) स्वामी नयनपथगामी भवतु मे ॥ 3॥

कृपापारावारास्सजलजलदश्रेणिरुचिरो

रमावाणीसौमस्सुरदमलपद्मोद्भवमुखैः ।

सुरेन्द्रैराराध्यः(श्) श्रुतिगणशिखागीतचरितो
जगन्नाथः(स्) स्वामी नयनपथगामी भवतु मे ॥ 4 ॥

रथारूढो गच्छन् पथि मिलितभूदेवपटलैः(स्)
स्तुतिप्रादुर्भावं(म्) प्रतिपद मुपाकर्ण्य सदयः।
दयासिन्धुर्बन्धुस्सकलजगता सिन्धुसुतया
जगन्नाथः(स्) स्वामी नयनपथगामी भवतु मे ॥ 5॥

परब्रह्मापीडः(ख्) कुवलयदलोत्फुल्लनयनो
निवासी नीलाद्रौ निहितचरणोऽनन्तशिरसि ।
रसानन्दो राधासरसवपुरालिङ्गनसखो
जगन्नाथः(स्) स्वामी नयनपथगामी भवतु मे ॥6॥

न वै प्रार्थ्यं(म्) राज्यं(न्) न च कनकतां(म्) भोगविभवं(न्)
न याचेऽहं(म्) रम्यां(न्) निखिलजनकाम्यां(वँ) वरवधूम् ।
सदा काले काले प्रमथपतिना गीतचरितो
जगन्नाथः(स्) स्वामी नयनपथगामी भवतु मे ॥ 7 ॥

हर त्वं(म्) सं(म्)सारं(न्) द्रुततरमसारं(म्) सुरपते
हर त्वं(म्) पापानां(वँ) विततिमपरां(यँ) यादवपते ।
अहो दीनानाथं(न्) निहितमचलं(न्) निश्चितपदं(ञ्)
जगन्नाथः(स्) स्वामी नयनपथगामी भवतु मे ॥ 8॥

जगन्नाथाष्टकं(म्) पुन्यं(यँ) यः(फ्) पठेत् प्रयतः(श्) शुचिः ।

सर्वपाप विशुद्धात्मा विष्णुलोकं(म्) स गच्छति ॥

इति श्रीमद् शङ्कराचार्यविरचितं(ञ्) जगन्नाथाष्टकं(म्) सम्पूर्णं(म्)॥